श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टाविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाविंशः सर्गः ॥

## मेघनादजयन्तयोर्युद्धं पुलोम्ना जयन्तस्यान्यत्रापनयनमिन्द्रस्य रणभूमौ प्रवेशो रुद्रैर्मरुद्भिश्च राक्षससेनायाः संहार इन्द्ररावणयोर्युद्धम्

सुमालिनं हतं दृष्ट्वा वसुना भस्मसात्कृतम्।
स्वसैन्यं विद्रुतं चापि लक्षयित्वार्दितं सुरैः॥ **7.28.1** ॥

ततः स बलवान् क्रुद्धो रावणस्य सुतस्तदा।
निवर्त्य राक्षसान् सर्वान् मेघनादो व्यवस्थितः॥ **7.28.2** ॥

स रथेनाग्निवर्णेन कामगेन महारथः।
अभिदुद्राव सेनां तां वनान्यग्निरिव ज्वलन्॥ **7.28.3** ॥

ततः प्रविशतस्तस्य विविधायुधधारिणः।
विदुद्रुवुर्दिशः सर्वा दर्शनादेव देवताः॥ **7.28.4** ॥

न बभूव तदा कश्चिद् युयुत्सोरस्य सम्मुखे।
सर्वानाविद्ध्य वित्रस्तांस्ततः शक्रोऽब्रवीत् सुरान्॥ **7.28.5** ॥

न भेतव्यं न गन्तव्यं निवर्तध्वं रणे सुराः।
एष गच्छति पुत्रो मे युद्धार्थमपराजितः॥ **7.28.6** ॥

ततः शक्रसुतो देवो जयन्त इति विश्रुतः।
रथेनाद्भुतकल्पेन सङ्ग्रामे सोऽभ्यवर्तत॥ **7.28.7** ॥

ततस्ते त्रिदशाः सर्वे परिवार्य शचीसुतम्।
रावणस्य सुतं युद्धे समासाद्य प्रजघ्निरे॥ **7.28.8** ॥

तेषां युद्धं समभवत् सदृशं देवरक्षसाम्।
महेन्द्रस्य च पुत्रस्य राक्षसेन्द्रसुतस्य च॥ **7.28.9** ॥

ततो मातलिपुत्रस्य गोमुखस्य स रावणिः।
सारथेः पातयामास शरान् कनकभूषणान्॥ **7.28.10** ॥

शचीसुतश्चापि तथा जयन्तस्तस्य सारथिम्।
तं चापि रावणिः क्रुद्धः समन्तात् प्रत्यविध्यत॥ **7.28.11** ॥

स हि क्रोधसमाविष्टो बली विस्फारितेक्षणः।
रावणिः शक्रतनयं शरवर्षैरवाकिरत्॥ **7.28.12** ॥

ततो नानाप्रहरणाञ्छितधारान् सहस्रशः।
पातयामास सङ्क्रुद्धः सुरसैन्येषु रावणिः॥ **7.28.13** ॥

शतघ्नीमुसलप्रासगदाखड्गपरश्वधान्।
महान्ति गिरिशृङ्गाणि पातयामास रावणिः॥ **7.28.14** ॥

ततः प्रव्यथिता लोकाः सञ्जज्ञे च तमस्ततः।
तस्य रावणपुत्रस्य शत्रुसैन्यानि निघ्नतः॥ **7.28.15** ॥

ततस्तद् दैवतबलं समन्तात् तं शचीसुतम्।
बहुप्रकारमस्वस्थमभवच्छरपीडितम्॥ **7.28.16** ॥

नाभ्यजानन्त चान्योन्यं रक्षो वा देवताथवा।
तत्र तत्र विपर्यस्तं समन्तात् परिधावत॥ **7.28.17** ॥

देवा देवान् निजघ्नुस्ते राक्षसान् राक्षसास्तथा।
सम्मूढास्तमसाच्छन्ना व्यद्रवन्नपरे तथा॥ **7.28.18** ॥

एतस्मिन्नन्तरे वीरः पुलोमा नाम वीर्यवान्।
दैत्येन्द्रस्तेन सङ्गृह्य शचीपुत्रोऽपवाहितः॥ **7.28.19**॥

सङ्गृह्य तं तु दौहित्रं प्रविष्टः सागरं तदा।
आर्यकः स हि तस्यासीत् पुलोमा येन सा शची॥ **7.28.20**॥

ज्ञात्वा प्रणाशं तु तदा जयन्तस्याथ देवताः।
अप्रहृष्टास्ततः सर्वा व्यथिताः सम्प्रदुद्रुवुः॥ **7.28.21**॥

रावणिस्त्वथ सङ्क्रुद्धो बलैः परिवृतः स्वकैः।
अभ्यधावत देवांस्तान् मुमोच च महास्वनम्॥ **7.28.22**॥

दृष्ट्वा प्रणाशं पुत्रस्य दैवतेषु च विद्रुतम्।
मातलिं चाह देवेशो रथः समुपनीयताम्॥ **7.28.23**॥

स तु दिव्यो महाभीमः सज्ज एव महारथः।
उपस्थितो मातलिना वाह्यमानो महाजवः॥ **7.28.24**॥

ततो मेघा रथे तस्मिंस्तडित्वन्तो महाबलाः।
अग्रतो वायुचपला नेदुः परमनिःस्वनाः॥ **7.28.25**॥

नानावाद्यानि वाद्यन्त गन्धर्वाश्च समाहिताः।
ननृतुश्चाप्सरःसङ्घा निर्याते त्रिदशेश्वरे॥ **7.28.26**॥

रुद्रैर्वसुभिरादित्यैरश्विभ्यां समरुद्गणैः।
वृतो नानाप्रहरणैर्निर्ययौ त्रिदशाधिपः॥ **7.28.27**॥

निर्गच्छतस्तु शक्रस्य परुषः पवनो ववौ।
भास्करो निष्प्रभश्चैव महोल्काश्च प्रपेदिरे॥ **7.28.28**॥

एतस्मिन्नन्तरे शूरो दशग्रीवः प्रतापवान्।
आरुरोह रथं दिव्यं निर्मितं विश्वकर्मणा॥ **7.28.29**॥

पन्नगैः सुमहाकायैर्वेष्टितं लोमहर्षणैः।
येषां निःश्वासवातेन प्रदीप्तमिव संयुगे॥ **7.28.30** ॥

दैत्यैर्निशाचरैश्चैव स रथः परिवारितः।
समराभिमुखो दिव्यो महेन्द्रं सोऽभ्यवर्तत॥ **7.28.31** ॥

पुत्रं तं वारयित्वा तु स्वयमेव व्यवस्थितः।
सोऽपि युद्धाद् विनिष्क्रम्य रावणिः समुपाविशत्॥ **7.28.32** ॥

ततो युद्धं प्रवृत्तं तु सुराणां राक्षसैः सह।
शस्त्राणि वर्षतां तेषां मेघानामिव संयुगे॥ **7.28.33** ॥

कुम्भकर्णस्तु दुष्टात्मा नानाप्रहरणोद्यतः।
नाज्ञायत तदा राजन् युद्धं केनाभ्यपद्यत॥ **7.28.34** ॥

दन्तैः पादैर्भुजैर्हस्तैः शक्तितोमरमुद्गरैः।
येन तेनैव सङ्क्रुद्धस्ताडयामास देवताः॥ **7.28.35** ॥

स तु रुद्रैर्महाघोरैः सङ्गम्याथ निशाचरः।
प्रयुद्धस्तैश्च सङ्ग्रामे क्षतः शस्त्रैर्निरन्तरम्॥ **7.28.36** ॥

बभौ शस्त्राचिततनुः कुम्भकर्णः क्षरन्नसृक्।
विद्युत्स्तनितनिर्घोषो धारावानिव तोयदः॥ **7.28.37** ॥

ततस्तद् राक्षसं सैन्यं प्रयुद्धं समरुद्गणैः।
रणे विद्रावितं सर्वं नानाप्रहरणैस्तदा॥ **7.28.38** ॥

केचिद् विनिहताः कृत्ताश्चेष्टन्ति स्म महीतले।
वाहनेष्ववसक्ताश्च स्थिता एवापरे रणे॥ **7.28.39** ॥

रथान् नागान् खरानुष्ट्रान् पन्नगांस्तुरगांस्तथा।
शिशुमारान् वराहांश्च पिशाचवदनानपि॥ **7.28.40** ॥

तान् समालिङ्ग्य बाहुभ्यां विष्टब्धाः केचिदुत्थिताः।
देवैस्तु शस्त्रसम्भिन्ना मम्रिरे च निशाचराः॥ **7.28.41** ॥

चित्रकर्म इवाभाति सर्वेषां रणसम्प्लवः।
निहतानां प्रसुप्तानां राक्षसानां महीतले॥ **7.28.42** ॥

शोणितोदकनिष्पन्दा काकगृध्रसमाकुला।
प्रवृत्ता संयुगमुखे शस्त्रग्राहवती नदी॥ **7.28.43** ॥

एतस्मिन्नन्तरे क्रुद्धो दशग्रीवः प्रतापवान्।
निरीक्ष्य तु बलं सर्वं दैवतैर्विनिपातितम्॥ **7.28.44** ॥

स तं प्रतिविगाह्याशु प्रवृद्धं सैन्यसागरम्।
त्रिदशान् समरे निघ्नञ्शक्रमेवाभ्यवर्तत॥ **7.28.45** ॥

ततः शक्रो महच्चापं विस्फार्य सुमहास्वनम्।
यस्य विस्फारनिर्घोषैः स्तनन्ति स्म दिशो दश॥ **7.28.46** ॥

तद् विकृष्य महच्चापमिन्द्रो रावणमूर्धनि।
पातयामास स शरान् पावकादित्यवर्चसः॥ **7.28.47** ॥

तथैव च महाबाहुर्दशग्रीवो निशाचरः।
शक्रं कार्मुकविभ्रष्टैः शरवर्षैरवाकिरत्॥ **7.28.48** ॥

प्रयुध्यतोरथ तयोर्बाणवर्षैः समन्ततः।
नाज्ञायत तदा किञ्चित् सर्वं हि तमसा वृतम्॥ **7.28.49** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टाविंशः सर्गः॥